# E-Text

| | | |
|---|---|---|
| पत्रस्य नाम | : | लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्) |
| पत्रसंख्या | : | V |
| पाठ्यांशनाम | : | अकः सवर्णे दीर्घः इत्यारभ्य प्रत्यभिवादेऽशूद्रे इति यावत् |
| पाठ्यांशसंख्या | : | 12 |

पाठ्यांशस्य मुख्याः अंशाः :

1) अकः सवर्णे दीर्घः (ऋति सवर्णे ऋर् वा), (लृति सवर्णे लृल् वा) वार्तिकम्।
2) सर्वत्र विभाषा गोः, अवङ् स्फोटायनस्य, इन्द्रे च।
3) प्लुतप्रगृह्या अचि नित्यम्, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च, ऋत्यकः।
4) प्रत्यभिवादेऽशूद्रे।

विषयसूची


1.0 : अकः सवर्णे दीर्घः

1.1 : ऋति सवर्णे ऋर् वा, लृति सवर्णे लृल् वा - वार्तिकम्

2.0 : सर्वत्र विभाषा गोः

2.1 : अवङ् स्फोटायनस्य

2.2 : इन्द्रे च

3.0 : प्लुतप्रगृह्या अचि नित्यम्

3.1 : इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च

3.2 : ऋत्यकः

4.0 : वाक्यस्य टेः प्लुत उदात्तः

4.1 : प्रत्यभिवादेऽशूद्रे



e-Pathshala पाठशाला
A Gateway to all Post Graduate Courses

1.0 'अकः सवर्णे दीर्घः'

**सूत्रार्थः –**

इको यणचीति सूत्रात् अचीत्यनुवर्तते। एकः पूर्वपरयोः इत्यधिकृतम्। तथाच - **अकः सवर्णे अचि परे पूर्वपरयोः स्थाने एको दीर्घ आदेशः स्यात्** इति सूत्रार्थः।

**उदाहरणानि –**

1. दैत्य + अरिः = दैत्यारिः।
2. श्री + ईशः = श्रीशः।
3. विष्णु + उदयः = विष्णूदयः।।

**अत्र प्रश्नः** - सूत्रार्थे अचि इति किमर्थं निवेश्यते। 'नाऽऽज्झलौ' इति सूत्रेण अचां हलां च परस्परसावर्ण्यं प्रतिषिध्यते। तस्मात्, अकः सवर्णः हल् नास्त्येव। तथाच, (अकः सवर्णे परे) इत्यलम्, किमर्थम् (अकः सवर्णे अचि परे) इत्युच्यते?

**समाधानम्** - कस्य कस्य वर्णस्य कः कः वर्णः सवर्णः इति ज्ञानात् परमेव अणुदित्सवर्णस्य चाऽप्रत्यय इति सूत्रप्रवृत्त्या अकारादिवर्णैः तत्तत्सवर्णानां ग्रहणं सम्भवति। ग्रहणकशास्त्रप्रवृत्तेः पूर्वं अइउण् ऋलृक्..... इत्यादिसूत्रस्था वर्णाः स्वसवर्णान् न ग्रहीष्यन्ति।

कस्य कस्य वर्णस्य कः कः वर्णः सवर्णः इति व्यवस्था च (तुल्यास्यप्रयत्नं सवर्णम्, नाऽऽज्झलौ) इति वचनद्वयेन उच्यते।

तत्र नाऽऽज्झलौ इति सूत्रे अच्पदेन दीर्घस्य इवर्णस्य अग्रहणात्, ईकारशकारयोः स्थानप्रयत्नतुल्यत्वेन प्राप्तस्य सावर्ण्यस्य प्रतिषेधो न सिध्यति। तथाच कुमारी शेते इत्यादौ (अकः सवर्णे दीर्घः) इत्यनेन सवर्णदीर्घः प्राप्नोति। तद्वारणार्थम् अचि इत्यनुवर्त्य सूत्रार्थ उच्यते।

### 1.1 ऋति सवर्णे ऋर् वा, लृति सवर्णे लृल् वा वार्तिकम्

(अकः सवर्णे दीर्घः) इत्यत्र कौमुद्यां वार्तिकत्वेन (ऋति सवर्णे ऋर् वा), (लृति सवर्णे लृल् वा) - इति वचनद्वयं पठितम्। तत्र वस्तुतः (ऋति ऋर् वा) (लृति लृल् वा) इत्येव वार्तिकस्वरूपम्। सूत्रस्थं सवर्णपदं वार्तिके योजितं कौमुदीकृता। अकः ह्रस्वे सवर्णे ऋकारे परे पूर्वपरयोः स्थाने ऋर् इति अज्भक्तिविशिष्टरेफद्वयरूपः द्विमात्रिकः ईषत्स्पृष्टप्रयत्नवान् वर्णविशेषः अच् एकादेशो वा स्यादिति प्रथमवार्तिकार्थः। अकः ह्रस्वे सवर्णे लृकारे परे पूर्वपरयोः स्थाने लृल् इति अज्भक्तिविशिष्टलकारद्वयरूपः द्विमात्रिकः ईषत्स्पृष्टप्रयत्नवान् वर्णविशेषः अच् एकादेशो वा स्यादिति द्वितीयवार्तिकार्थः।

सूत्रात् सवर्णपदमनुवर्त्य वार्तिकार्थो वक्तव्यः अन्यथा दधि + ऋकारः, दधि + लृकारः इत्यादौ असवर्णे ऋति लृति चापि वार्तिकं प्रवर्तेत।

होतृ + ऋकारः, होतृ + लृकारः गम्ल् ऋकारः गम्ल् लृकारः इत्यादिस्थले अस्य वार्तिकद्वयस्य प्रवृत्तौ (होत् ऋर् कारः) (होत् लृल् कारः) (गम् ऋर् कारः) (गम् लृल् कारः) रूपाणि विकल्पेन सिध्यन्ति।

ऋति लृति इत्येवं तपरकरणाद् दीर्घे ऋवर्णे वार्तिकमिदं न प्रवर्तते। यथा अयोगवाहानाम् अट्प्रत्याहारे उपदेशः स्वीक्रियते तथा अस्मिन् वार्तिकद्वये विहितयोः वर्णविशेषयोः अच्प्रत्याहारे उपदेशः इति स्वीक्रियते। तथाच तयोः अच्त्वात् प्लुतः सिध्यति। अच्प्रत्याहारेऽपि अइउण् सूत्रानन्तरमेव। अन्यथा तयोः अण्त्वे सति उरण् रपर इति रपरत्वं प्रसज्येत।

**वार्तिकप्रत्याख्यानम्** - यदा ऋकार - ऋकारयोः संहिता भवति तदा रेफद्वयवान् विवृतप्रयत्नवान् स्थानी। तयोः स्थाने भवन् एकादेशः रेफद्वयवत्त्वसाम्येन ऋर्

भवितुमर्हति। विवृतप्रयत्नवत्त्वसाम्येन दीर्घ ॠवर्णोऽपि भवितुमर्हति। तथा ऋकार-लृकारयोः सन्धौ  रेफवान् लकारवान् विवृतत्ववान् स्थानी। तयोः स्थाने भवन् एकादेशः रेफवत्त्वसाम्येन ॠर्, लकारवत्त्वसाम्येन लृल्, विवृतवत्त्वसाम्येन दीर्घ ॠवर्णो वा भविष्यति। तथाच स्थानेन्तरतमसूत्रेणैव इष्टसिद्धिमाश्रित्य इदं वार्तिकद्वयं तुल्यास्यसूत्रे भाष्ये प्रत्याख्यातम्। ऋवर्णे लृवर्णे च अज्भक्तिरस्तीत्यत्र किं प्रमाणम्? वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते इति पक्षः स्वीकृतः भाष्ये, मातृणाम् इत्यादौ णत्वादिसिद्ध्यर्थम्। यदि वर्णैकदेशानां वर्णग्रहणेन ग्रहणं स्यात् तर्हि प्रलूय, खट्वाभिः, वाचा तरति इत्यादौ दोषः प्राप्नोति। परन्तु दीर्घादिति तुग्विधानसामर्थ्यात् प्रलूय इत्यादौ, अतो भिस ऐस् इत्यत्र तपरकरणसामर्थ्यात् खट्वाभिरित्यादौ, नौद्व्यच इति सूत्रे नौग्रहणसामर्थ्यात् वाचा तरतीत्यादौ च दोषो न भविष्यतीति इति ज्ञापकैः समाहितं भाष्ये। भेदेन अप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशस्वतन्त्रवर्णाश्रयाणि कार्याणि न भवन्ति - इति ज्ञापकैः साधितम्।

यदि वर्णैकदेशानां वर्णग्रहणेन ग्रहणं तर्हि (प्रातर् + ऋतम्) इत्यत्र रो रि इति रेफलोपापत्तिः, (तद् + लृकार) इत्यादौ तोर्लि इत्यनेन परसवर्णापत्तिः स्यात्। परन्तु तथा दोषाशङ्का वा समाधानं वा भाष्यकृता यतः न कृतम् अतः ज्ञायते ऋकारे लृकारे च रेफं परितः अज्भक्तिरस्तीति। तथाच तया व्यवधानात् रोरि तोर्लि इति न प्रवर्तते। यत्तद् रेफात्परं भक्तेः इति हयवरट्सूत्रभाष्यवाक्यमपि अज्भक्तिसत्वे प्रमाणम्।

### 2.0 सर्वत्र विभाषा गोः

एङः पदान्तादति इत्यतः पदान्तादित्यनुवर्तते। प्रकृत्यान्तःपादमव्यपरे इति सूत्रात् प्रकृत्या इत्यनुवर्तते। तथाच - गोशब्दावयवो यः पदान्त एङ्, तस्मादकारे परे

पूर्वपरवर्णौ विकल्पेन प्रकृत्या स्तः सर्वत्र (लोके वेदे च)। प्रकृतिशब्दोत्र स्वभाववाची। प्रकृत्या अवतिष्ठते , स्वस्य यः भावः तमपरित्यज्य वर्तते इत्यर्थः। तथाच पूर्वरूपादिकं न स्यादत्र। यथा - गो अग्रम् इति स्थिते विकल्पेन प्रकृतिभावे गोअग्रम् इति। प्रकृतिभावाभावे, पूर्वरूपे गोऽग्रम् इति।

(प्रकृत्यान्तःपादमव्यपरे) इति सूत्रस्य (नान्तःपादमव्यपरे) इति पाठान्तरमस्ति। द्वावपि पाठौ भाष्यसम्मतावेव। फलमपि तुल्यम्। तथाहि- नान्तःपादमिति पाठे ततः (सर्वत्र विभाषा गोः) इत्यत्र नेत्यनुवर्त्य (गोशब्दस्य अकारे परे यद्यत् प्राप्तं तद् सर्वं विकल्पेन न भवति) इत्यर्थ उच्यते।

अत्र मनोरमायां तु फलभेदः प्रदर्शितः। तथाहि- नेत्यनुवर्त्य व्याख्याने (अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा) इति न्यायेन पूर्वरूपस्यैव विकल्पेन निषेधः सिध्यति, तथाच एचोऽयवायाव इत्यनेन अवादेशे गवग्रम् इत्यनिष्टमपि आपद्येत, तस्मात् प्रकृत्या इत्येव पाठः युक्तः इति तदाशयः। परन्तु बाध्यसामान्यचिन्तामाश्रित्य (यद्यत् प्राप्तं तत् सर्वं न) इत्यर्थस्वीकारेण स दोषो न भविष्यतीति नागेशाभिप्रायः।

Pathshala पाठशाला A Gateway to all Post Graduate Courses

**2.1 अवङ् स्फोटायनस्य**

(एङः पदान्तादति, सर्वत्र विभाषा गोः) - इत्यतः (एङः पदान्ताद् गोः) इत्यनुवर्तते। अनेन सूत्रेण अवङादेशो विकल्पेन विधीयते। पूर्वसूत्रात् विभाषापदानुवृत्त्या विकल्पविधित्वमिति दीक्षितादीनां मतम्। तेषां मते स्फोटायनग्रहणम् आदरप्रदर्शनार्थम्। नागेशमते तु स्फोटायनग्रहणादेव विकल्पसिद्धिः। अति इत्यस्यानुवृत्तिः पूर्वसूत्रपर्यन्तमेव। अत्र तु अचीत्यनुवर्तते। एवञ्च - पदान्तात् गोशब्दावयवाद् एङः अचि परे अवङादेशः स्यात् स्फोटायनस्य मतेन - इति सूत्रार्थः।

अवङः ङित्वात् अन्तादेशस्य भवन् आदेशः ओकारस्य स्थाने भवति। तथाच - गो अग्रम् इत्यत्र संहितायां गवाग्रम्, गोअग्रम्, गोऽग्रम् इति रूपत्रयं भवति।

सन्निपातपरिभाषाया अनित्यत्वात् दीर्घः - गो अग्रम् इत्यत्र अचि परे ओकारस्य अवङादेशे कृते गव अग्रम् इति जाते सवर्णदीर्घैकादेशे गवाग्रमिति। सवर्णदीर्घैकादेशं प्रति निमित्तीभूय अवङादेशः स्वनिमित्तभूतं सन्निपातं विहन्ति। कष्टाय क्रमणे इत्यादिनिर्देशेन तस्याः परिभाषाया अनित्यत्वज्ञापनात् प्रकृते तदप्रवृत्तौ सवर्णदीर्घः सिध्यति। पदान्तादित्यनुवृत्तेः फलं गवि इत्यादौ अवङादेशाभावः।

ननु गवामक्षीव इत्यर्थे गो अक्ष इति स्थिते गवाक्ष इत्यवङादेशविशिष्टमेव रूपमिष्यते, परन्तु अस्य सूत्रस्य वैकल्पिकत्वात् गोऽग्रं गोअग्रं गवाग्रमित्यत्रेव रूपत्रयं कथं न -इति चेत्। अत्र व्यवस्थितविभाषा आश्रीयते। तथाहि सूत्रमिदं क्वचिल्लक्ष्ये प्रवर्तते, क्वचिल्लक्ष्ये न प्रवर्तते। लक्ष्यभेदेन प्रवृत्त्यप्रवृत्तिभ्यां सूत्रस्य वैकल्पिकत्वं सम्पन्नम्। न तु प्रतिलक्ष्यं प्रवृत्त्यप्रवृत्तिभ्याम् अवङ् विकल्प्यते।

A Gateway to all Post Graduate Courses

**देवत्रातो गलो ग्राह इतियोगे च सद्विधिः।**

**मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः।।**

इति व्यवस्थितविभाषास्थलसंग्रहश्लोकः। अन्यान्यपि व्यवस्थितविभाषा-स्थलानि भाष्यसम्मतानि सन्ति। यथा - अग्नीत्प्रेषणे परस्य च , अजेर्व्यघञपोः इत्यादि।

गवाक्ष इत्यत्रेव गवेन्द्र इत्यत्रापि त्रैरूप्याभावो व्यवस्थितविभाषाश्रयणेन सिध्यति। परन्तु भाष्यकृता व्यवस्थितविभाषात्वं गवाक्ष इत्यादिस्थले नित्यत्वार्थमाश्रितम्। भाष्योक्तलक्ष्याण्येव व्यवस्थितविभाषाश्रयणेन साधनीयानि।

2.2 इन्द्रे च

क्वचिद् भाष्यपुस्तके चशब्दरहितः पाठः। इको यणचीत्यतः अचीत्यनुवर्तते। इन्द्रावयवे अचि परे गोशब्दावयवस्य एङः अवङ् स्यात् इत्यर्थः।

गो इन्द्र - गव इन्द्र - गुणे गवेन्द्रः। इन्द्रशब्दावयवे अचि इत्यर्थकरणात् गो इन्द्रयज्ञ इत्यादिस्थलेऽपि सिध्यति। तथाहि- गोशब्दात् इन्द्रशब्दः समासे एव भवितुमर्हति। ततश्च यदि गोशब्दादिन्द्रशब्दे परे इत्यर्थः तर्हि इन्द्रशब्दस्य यत्र उत्तरपदत्वं गवेन्द्र इति तत्रैव स्यात्।

3.0 प्लुतप्रगृह्या अचि नित्यम्

अचीत्यनुवर्तमाने पुनरज्ग्रहणं प्रत्यासत्त्या यत्राचि अनयोः प्रकृतिभावः तदज्निमित्तककार्यस्यैव तेनाभाव इत्यर्थलाभार्थम्। तेन जानु उ अस्य रुजति जानू अस्येत्यादौ सवर्णदीर्घरूपसन्धिर्भवत्येव। -इति शेखरे। तदाशयः - इन्द्रे च इति अनन्तरपूर्वसूत्रं प्रति इको यणचीति सूत्रात् अचीत्यनुवर्तते। तदेव अस्मिन्नपि अनुवर्त्यताम्। किमर्थं पुनरज्ग्रहणम् इति प्रश्नः।

उत्तरं तु - अस्मिन् सूत्रे अज्ग्रहणाभावे यद्यपि अनुवृत्त्या अच्पदं लभ्येत तथापि - यथा (उ + अस्य) इत्यादौ निपात एकाजनाङ् इति सूत्रेण उ इत्यस्य प्रगृह्यत्वात् अचि परे प्रकृतिभावः तथा (जानु + उ + अस्य) इत्यादौ पूर्वेण उकारेण संहितायामपि प्रकृतिभावः आपद्येत। अचि परे प्लुतप्रगृह्ययोः प्रकृत्या अवस्थानम् इति तदा अर्थः। पुनरज्ग्रहणसामर्थ्यात्तु यस्मिन्नचि परे प्रकृतिभावो विधीयते तत्संहितानिमित्तकविकृतिः न भविष्यति इत्यर्थः सिध्यति। तथाच पूर्वेण संहितायां तन्निमित्तकविकृतिः सिध्येदेव।

**शेखरे - नित्यमिति किम्। वाग्रहणनिवृत्त्यैव तल्लाभ इति प्रश्नः।**

सर्वत्र विभाषा गोरित्यतः विभाषाग्रहणम्, अवङ् स्फोटायनस्येत्यतः स्फोटायनस्येति वा न अनुवर्तते, इन्द्रे च इति अवङादेशारम्भसामर्थ्यात्। तथाच नित्यंग्रहणं विनापि नित्य एव प्रकृतिभावो भविष्यति खलु इति प्रश्नः। उत्तरं तु - हरी ईशौ इत्यादिसवर्णपरकत्वे प्रगृह्यत्वप्रयुक्तः प्रकृतिभावः सावकाशः, चक्री अत्र इत्यादिप्रगृह्येतरस्थले इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति ह्रस्वसमुच्चितप्रकृतिभावः सावकाशः। हरी एतौ इत्यादिस्थले प्रगृह्यत्वप्रयुक्तस्य इकोसवर्णे इत्यनेन विहितस्य च प्राप्तौ परत्वात् इकोऽसवर्णे इति ह्रस्वसमुच्चितः प्रकृतिभावः प्राप्नोति। नित्यग्रहणसामर्थ्यात्तु सोऽपि बाध्यते अनेन। अवधारणार्थकेन नित्यशब्देन प्रकृतिभावादन्यत् सर्वं व्यावर्त्यते।

### 3.1 इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च

एङः पदान्तादति इत्यतः पदान्तादिति प्रथमान्ततया अनुवर्तते। प्लुतप्रगृह्या अचीत्यतः अचीत्यनुवर्तते। शाकल्यग्रहणेन विकल्पः फलति। पदान्ता इकः असवर्णे अचि परे प्रकृत्या स्युः ह्रस्वश्च, वा -इति सूत्रार्थः।

**अत्र शेखरे - वेति। ह्रस्वयणोः विधानसामर्थ्यात्तु न विकल्पसिद्धिः, अपदान्तादौ यणश्चरितार्थत्वात्** इति।

तद्विवरणम् - शाकल्यग्रहणं विनापि विकल्पः सिध्यति खलु, इक एव यणादेशो विधीयते अचि परे, इक एव ह्रस्वोऽपि विधीयते अचि परे, यदि एकेन अन्यस्य बाधः स्यात् तर्हि स व्यर्थः स्याद्, तथाच विधानसामर्थ्यादेव उभयमपि सिध्यति इति प्रश्नाशयः। समाधानं तु - यणादेशः नद्यः इत्यादौ अपदान्ते चरितार्थः। तस्मात् पदान्तस्थले ह्रस्वः यणादेशं बाधेत, विकल्पेन विधानात्तु यणादेशोऽपि सिध्यति।

**अत्र कौमुदी** - ह्रस्वविधानसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो व्यर्थ इति भाष्ये स्थितम्। इति। तद्विवरणम् – इकोऽसवर्णे शाकल्यस्य ह्रस्वः - इत्येवमुच्यमाने असवर्णे अचि परे पदान्तस्य इकः ह्रस्वः स्यात् इत्यर्थप्रतीत्या प्रकृतिभावो न सिध्येदिति कृत्वा तदनुकर्षणार्थं चकारः प्रयुक्तः सूत्रकृता। तच्च युक्तमेव। किन्तु, (ऋत्यकः) इत्युत्तरसूत्रे (पदान्ता अकः ऋति परे प्रकृत्या स्युः ह्रस्वश्च, वा) इति सूत्रार्थ इष्यते। स न सिध्येत्। (चानुकृष्टं नोत्तरत्र) इति न्यायवशात्। अस्मिन् सूत्रे चानुकृष्टं प्रकृत्यापदम् उत्तरत्र न अनुवर्तेत। तस्मात् तत्र - ह्रस्वे कृते तस्य विकारान्तं न भविष्यति, यदि विकारान्तरं स्यात् तर्हि ह्रस्वविधिरेव व्यर्थः स्यात् -इत्येवं ह्रस्वविधानसामर्थ्यमाश्रित्य प्रकृतिभावः साधनीयः। तर्हि तत् सामर्थ्याश्रयणं प्रकृतसूत्रेऽपि कर्तुं शक्यते , तथाच तदर्थं कृतः चकारो व्यर्थः इति।

**शेखरे - एतेन ह्रस्वाभावे प्रकृतिभावार्थं चकारः इति न्यासाद्युक्तमपास्तम्।**

**तद्विवरणम्** - ह्रस्वग्रहणं व्यर्थमिति भाष्यकृतैव उक्तम्। किञ्च चकारस्य यत् प्रयोजनं न्यासकारेण कथितं तत्तु अन्यथा साधयितुं शक्यते। तथाहि चक्री अत्र इत्यादौ इकोऽसवर्णे इति सूत्रेण चक्रि अत्र इति रूपं, इको यणचीति सूत्रेण चक्र्यत्र इति रूपं संहिताया अविवक्षायां चक्री अत्र इति रूपं च सिध्यति। तथाच ह्रस्वयण्रहितरूपसिध्यर्थं चकारोऽनावश्यक एव। अतः न्यासोक्तं न युक्तमिति।

पर्शुशब्दात् पर्श्वा णस् वक्तव्य इति वार्तिकेन णसि पर्शु णस्। आदिवृद्धौ पार्शु णस्। यचि भमिति पदसंज्ञा नास्ति, सिति च इति सूत्रेण पदसंज्ञया बाधात्। पदत्वात् ओर्गुण इत्यस्याभावे यणादेशे पार्श्वम् इति रूपमिष्यते। परन्तु इकोऽसवर्णे इत्यनेन प्रकृतिभावोप्यत्र विकल्पेन आपद्यते। तत्र वार्तिककारः प्रतिषेधति - न

समासे, सिति च इति। समासे इकोऽसवर्णे इति सूत्रं न प्रवर्तते, सिति परे च न प्रवर्तते - इति तदाशयः।

3.2 ऋत्यकः

**शेखरे - सवर्णार्थम् अनिगर्थञ्च इदम्। इति।**

**तद्विवरणम् –** इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति सूत्रेण ह्रस्वसमुच्चितप्रकृतिभावो विकल्पेन विधीयते। अनेनापि सूत्रेण स एव विधीयते। किन्तु होतृ ऋकार इत्यादौ असवर्णे इति निषेधात्, ब्रह्मा ऋषिः इत्यादौ इकः अभावाच्च इकोऽसवर्णे इति न प्रवर्तते। तादृशस्थले अनेन सूत्रेण ह्रस्वसमुच्चितप्रकृतिभावः।

**अत्र कौमुद्यां -** पदान्ता इत्येव, आर्च्छत्।- इति वाक्यम्।

तद्विवरणम् - ऋत्यकः इति सूत्रस्य (पदान्ताः अकः ऋति परे प्रकृत्या स्युः ह्रस्वश्च, वा) - इत्यर्थः। तत्र पदान्ता इति एङः पदान्तादतीत्यतः प्रथमान्ततया अनुवृत्तम्। तथाच अकः पदान्तत्वाभावे सूत्रमिदं न प्रवर्तते। आ + ऋच्छत् = आर्च्छत् इत्यत्र आकारः आट् आगमः, धातोरवयवः, न तु तस्य पदान्तत्वमस्ति। सूत्रार्थे पदान्ता इत्यस्याभावे अत्रापि प्रवर्तेत।

**अत्र शेखरे - एतेन आटश्च इति पुनर्वृद्धिविधानार्थेन चेन उस्योमाङ्क्षु पररूपबाधवत् प्रकृतिभावस्यापि बाधेन इष्टसिद्धिरित्यपास्तम् इति वाक्यम्।**

**तद्विवरणम् -** ओमाङोश्च इति सूत्रे भाष्ये (उस्योमाङ्क्षु आटः प्रतिषेधः) इति वार्तिकमस्ति। आटः ओमि आङि उसि च परे (ओमाङोश्च, उस्यपदान्तात्) इति सूत्राभ्यां प्राप्तस्य पररूपस्य प्रतिषेधो वक्तव्यः, आटश्च इति वृद्धिरेव इष्यते -इति वार्तिकार्थः। आटश्च इति सूत्रे चकारग्रहणस्य पररूपबाधः फलमित्युक्त्वा वार्तिकं प्रत्याख्यातं भाष्यकृता। आटः अचि परे वृद्धिः स्यात् इति वृद्धिं विधाय 'च' इत्यनेन

पुनरपि तस्याः एव वृद्धेः पुनर्विधानेन यथा ङसि ओमि आङि च परे प्राप्तं पररूपं बाध्यते तथा आ ऋच्छत् इत्यत्र ऋत्यक इत्यनेन प्राप्तो ह्रस्वसमुच्चितप्रकृतिभावोऽपि बाध्यताम्, ततश्च पदान्तग्रहणानुवृत्तिः व्यर्था -इति कैश्चिदुक्तम्। किन्तु यद्यपि आ ऋच्छदित्यत्र तथा वक्तुं शक्येत तथापि (बहुच् + ऋग्वेदी = बह्वृग्वेदी ) इत्यादौ बहुचः प्रत्यययत्वात् तत्रत्यस्य उकारस्य पदान्तत्वाभावात् प्राप्तस्य प्रकृतिभावस्य वारणं न सिध्येत्। तस्मात् पदान्तग्रहणानुवृत्तिरावश्यकी एव।

**4.0 वाक्यस्य टेः प्लुत उदात्तः**

सूत्रे वाक्यस्येति किमर्थम्। तदभावे पदस्य इत्यधिकारसूत्रमिह सम्बध्येत। तदा - पदस्य टेः प्लुतः स्यादिति सूत्रार्थे सति वाक्यमध्ये विद्यमानानां पदानामपि टेः प्लुतः आपद्येत। वाक्यस्येति पदसत्वे तु वाक्यस्य अन्ते विद्यमानस्य पदस्य टेः प्लुतः सिध्यति, अनन्त्यस्य पदस्य टेः प्लुतो न भविष्यति। सूत्रे टेरिति किमर्थम्। तदभावे (अचश्च) इति परिभाषानुरोधेन अच इति षष्ठ्यन्तपदोपस्थानात् अजन्तस्यैव वाक्यस्य प्लुतः सिध्येत्। टिग्रहणे कृते तु - वाक्यस्य टेः अचः प्लुतः इत्यर्थः वक्तुं शक्यते। तथाच हलन्तवाक्यस्यापि प्लुतः सिध्यति।

**4.1 प्रत्यभिवादेऽशूद्रे**

**अत्र शेखरे - प्रणामादिभिराशिषं वाच्यमानो गुर्वादिः यत् प्रतिसंभाषते तत् प्रत्यभिवादः। न त्वाशीर्वचनं, शूद्रे आशीर्वादरूपप्रत्यभिवादाभावेन अशूद्र इत्यस्य वैयर्थ्यापत्तेः। अत एव भाष्ये अशूद्र इति किम्, कुशल्यसि तुषजक इत्युक्तम् - इति।**

**तद्विवरणम्** - अभिवादने कृते सति गुर्वादिभिः प्रयुज्यमानम् आशीर्वादवाक्यं प्रत्यभिवाद इति हरदत्तादिभिरुक्तम्। तदयुक्तम्। कुतः। तथासति अशूद्रे इति प्रतिषेधो

व्यर्थः। अभिवादे कृते सति, ब्राह्मणादिविषये यत् नियतानुपूर्वीकमाशीर्वादवाक्यं गुर्वादिभिः प्रयोक्तव्यत्वेन स्मृतिषु विहितं तदेव प्रत्यभिवादश्चेत् तादृशः प्रत्यभिवादः शूद्रविषये नैव स्मृतिषु विहितः इति कृत्वा प्रत्यभिवादवाक्यान्ते विहितस्य प्लुतस्य शूद्रविषये प्राप्तेरेवाभावात्। तस्मात् - येन केनापि अभिवादे कृते सति गुर्वादिभिः प्रयुज्यमानं (स्मृतिविहितं नियतानुपूर्वीकमाशीर्वचनं वा, अन्यद् वा) सर्वमप्यनुग्रहप्रयुक्तं प्रतिवचनम् इह प्रत्यभिवादशब्देन ग्राह्यम्। तथाच (कुशल्यसि तुषजक) इत्यादौ शूद्रविषयके प्रत्यभिवादे प्राप्तस्य प्लुतस्य प्रतिषेधार्थम् अशूद्रे इति सार्थकम्।

e-Pathshala पाठशाला
A Gateway to all Post Graduate Courses